# Kalyana-Vrishti-Stava

# કલ્યાણવૃષ્ટિસ્તવઃ

## Document Information

Text title : Kalyana-Vrishti-Stava

File name : kalyANavRiShTi.itx

Category : devii, stotra, shankarAchArya, devI, panchadashI, stavarAja

Location : doc_devii

Author : Adi Shanakaracharya

Transliterated by : Sunder Hattangadi, Aravind Krishnan

Proofread by : Sunder Hattangadi, Sridhar Seshagiri

Description-comments : A hymn in praise of Lakshmi

Latest update : September 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 26, 2025

*sanskritdocuments.org*

# કલ્યાણવૃષ્ટિસ્તવઃ

શ્રીગણેશાય નમઃ ।

કલ્યાણવૃષ્ટિભિરિવામૃતપૂરિતાભિ-
    ર્લક્ષ્મીસ્વયંવરણમઙ્ગલદીપિકાભિઃ ।
સેવાભિરમ્બ તવ પાદસરોજમૂલે
    નાકારિ કિં મનસિ ભાગ્યવતાં જનાનામ્ ॥ ૧॥

એતાવદેવ જનનિ સ્પૃહણીયમાસ્તે
    ત્વદ્વન્દનેષુ સલિલસ્થગિતે ચ નેત્રે ।
સાન્નિધ્યમુદ્યદરુણાયુતસોદરસ્ય
    ત્વદ્વિગ્રહસ્ય પરયા સુધયાપ્લુતસ્ય ॥ ૨॥

ઈશાત્વનામકલુષાઃ કતિ વા ન સન્તિ
    બ્રહ્માદયઃ પ્રતિભવં પ્રલયાભિભૂતાઃ ।
એકઃ સ એવ જનનિ સ્થિરસિદ્ધિરાસ્તે
    યઃ પાદયોસ્તવ સકૃત્પ્રણતિં કરોતિ ॥ ૩॥

લબ્ધ્વા સકૃત્ત્રિપુરસુન્દરિ તાવકીનં
    કારુણ્યકન્દલિતકાન્તિભરં કટાક્ષમ્ ।
કન્દર્પકોટિસુભગાસ્ત્વયિ ભક્તિભાજઃ
    સંમોહયન્તિ તરુણીર્ભુવનત્રયેઽપિ ॥ ૪॥

હ્રીંકારમેવ તવ નામ ગૃણન્તિ વેદા
    માતસ્ત્રિકોણનિલયે ત્રિપુરે ત્રિનેત્રે ।
ત્વત્સંસ્મૃતૌ યમભટાભિભવં વિહાય
    દીવ્યન્તિ નન્દનવને સહ લોકપાલૈઃ ॥ ૫॥

હન્તુઃ પુરામધિગલં પરિપીયમાનઃ
    ક્રૂરઃ કથં ન ભવિતા ગરલસ્યવેગઃ ।

નાશ્વાસનાય યદિ માતરિદં તવાર્ધં
    દેહસ્ય શશ્વદમૃતાપ્લુતશીતલસ્ય ॥ ૬॥

સર્વજ્ઞતાં સદસિ વાક્પટુતાં પ્રસૂતે
    દેવિ ત્વદઙ્ઘ્રિસરસીરુહયોઃ પ્રણામઃ ।
કિં ચ સ્ફુરન્મુકુટમુજ્જ્વલમાતપત્રં
    દ્વે ચામરે ચ મહતીં વસુધાં દદાતિ ॥ ૭॥

કલ્પદ્રુમૈરભિમતપ્રતિપાદનેષુ
    કારુણ્યવારિધિભિરમ્બ ભવત્કટાક્ષૈઃ ।
આલોકય ત્રિપુરસુન્દરિ મામનાથં
    ત્વય્યેવ ભક્તિભરિતં ત્વયિ બદ્ધતૃષ્ણમ્ ॥ ૮॥

હન્તેતરેષ્વપિ મનાંસિ નિધાય ચાન્યે
    ભક્તિં વહન્તિ કિલ પામરદૈવતેષુ ।
ત્વામેવ દેવિ મનસા સમનુસ્મરામિ
    ત્વામેવ નૌમિ શરણં જનનિ ત્વમેવ ॥ ૯॥

લક્ષ્યેષુ સત્સ્વપિ કટાક્ષનિરીક્ષણાના-
    માલોકય ત્રિપુરસુન્દરિ માં કદાચિત્ ।
નૂનં મયા તુ સદૃશઃ કરુણૈકપાત્રં
    જાતો જનિષ્યતિ જનો ન ચ જાયતે વા ॥ ૧૦॥

હ્રીંહ્રીમિતિ પ્રતિદિનં જપતાં તવાખ્યાં
    કિં નામ દુર્લભમિહત્રિપુરાધિવાસે ।
માલાકિરીટમદવારણમાનનીયા
    તાન્સેવતે વસુમતી સ્વયમેવ લક્ષ્મીઃ ॥ ૧૧॥

સમ્પત્કરાણિ સકલેન્દ્રિયનન્દનાનિ
    સામ્રાજ્યદાનનિરતાનિ સરોરુહાક્ષિ ।
ત્વદ્વન્દનાનિ દુરિતાહરણોદ્યતાનિ
    મામેવ માતરનિશં કલયન્તુ નાન્યમ્ ॥ ૧૨॥

કલ્પોપસંહૃતિષુ કલ્પિતતાણ્ડવસ્ય
    દેવસ્ય ખણ્ડપરશોઃ પરભૈરવસ્ય ।
પાશાઙ્કુશૈક્ષવશરાસનપુષ્પબાણા
    સા સાક્ષિણી વિજયતે તવ મૂર્તિરેકા ॥ ૧૩॥

લગ્નં સદા ભવતુ માતરિદં તવાર્ધં
    તેજઃ પરં બહુલકુઙ્કુમ પઙ્કશોણમ્ ।
ભાસ્વત્કિરીટમમૃતાંશુકલાવતંસં
    મધ્યે ત્રિકોણનિલયં પરમામૃતાર્દ્રમ્ ॥ ૧૪॥

હ્રીંકારમેવ તવ નામ તદેવ રૂપં
    ત્વન્નામ દુર્લભમિહ ત્રિપુરે ગૃણન્તિ ।
ત્વત્તેજસા પરિણતં વિયદાદિભૂતં
    સૌખ્યં તનોતિ સરસીરુહસમ્ભવાદેઃ ॥ ૧૫॥

હ્રીંકારત્રયસમ્પુટેન મહતા મન્ત્રેણ સન્દીપિતં
    સ્તોત્રં યઃ પ્રતિવાસરં તવ પુરો માતર્જપેન્મન્ત્રવિત્ ।
તસ્ય ક્ષોણિભુજો ભવન્તિ વશગા લક્ષ્મીશ્ચિરસ્થાયિની
    વાણી નિર્મલસૂક્તિભારભરિતા જાગર્તિ દીર્ઘં વયઃ ॥ ૧૬॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
કલ્યાણવૃષ્ટિસ્તવઃ સમ્પૂર્ણઃ ॥

Stotrarnavah refers (link 2) this to be composed
by Manmatha and adds verses 17 and 18.

કુવલ્યદલનીલં બર્બરસ્નિગ્ધકેશં
પૃથુતરકુચભારં ક્રાન્તકાન્તાવલગ્નમ્ ।
કિમિહ બહભિરુક્તૈઃ ત્વત્સ્વરૂપં પરં તત્
સકલભુવનમાતઃ સન્તતં સન્નિધત્તામ્ ॥ ૧૭॥

માણિક્યમાઙ્ગલિકસૂત્રિતપાલિકેન
મન્દસ્મિતેન મદનારુણપઙ્કજેન । (વદનારુણ)
કાલાન્તદીર્ઘમણિમઙ્ગલસૂત્રકણ્ઠી-
મમ્બાં વિશાલનયનાં મનસા સ્મરામિ ॥ ૧૮॥

॥ ઇતિ મન્મથેન વિરચિતઃ શ્રીકલ્યાણસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Prapanchasara (link 3) adds other set of

verses 17 and 18.

iti virachitametattraipurastotramAtraM
prakaTitaparamArthaM yogibhiryogamRigyam .
sakaladuritarogadhvaMsanAnanyakAryaM
prathitajanavidhAnaM sevyatAM bhaktiyuktaiH .. 17..

bandhukAbhAM trinetrAM shishiraruchikalAshekharAM raktavastrAM
atyantottu NgapInastanabharanamitAM yauvanArambharUDhAm .
sarvAla NkAradIptAM sarasijanilayAM mantrasa NkrAntamUrtiM
devIM pAshA NkushADhyAmabhayavarakarAM vishvayoniM namAmi .. 18..

Eન્ચોદેદ્ બ્ય્ ષુન્દેર્ ◌ઃઅત્તન્ગદિ
ઈન્દેપેદેન્ત્લ્ય્ બ્ય્ આર્વિન્દ્ ખ઼◌િ◌્શ્નન્।
Pરૂફ઼◌◌્રેઅદ્  બ્ય્ ષ્રિધર્ ષેશગિરિ સેશગિર્ અત્ એન્ગિનીરિન્ગ્। સ્દ્સુ। એદુ

*Kalyana-Vrishti-Stava*

pdf was typeset on February 26, 2025

Please send corrections to *sanskrit@cheerful.com*